नाकाशे पर्वते शून्ये न च चैत्यद्रुमे तथा। न तु द्वारेऽश्मसाकीर्णे नार्द्रपादस्तथावितः। पालाशे शयने नैव बहुदारुक्षते न च। न दग्धे विद्युता चैव वह्निप्लुष्टे जले तथा। न स्वपेत् सन्ध्ययोर्नित्यं न शिवस्यासने कटे। एवं स्वपन् नरो नित्यं सुखमेह परत्र भाक्। व्यत्यये च भवेद्दुःखी मृतो नरकमश्नुते" वह्निपु०। सति सूर्ये शय्या न पातनीया सूर्योदयात् पूर्वमुत्तोलनीयेत्याह स्मृतिः "भास्करादृष्टशय्यानि नित्याग्निसलिलानि च। सूर्यावलोकिदीपानि लक्ष्मा वेश्मानि भाजनम्। आसनं वसनं शय्या जायापत्यं कमण्डलुः। आत्मनः शुचिरेतानि न परेषां कदाचन"। न कदाचन इत्यनुमतिं विना अन्यथाऽऽतिथ्यानुपपत्तेः रघु०। व्यासः "शुचौ देशे विविक्ते तु गोमयेनोपलिप्तके। प्रागुदक्प्रवणे चैव संविशेत्तु सदा बुधः। माङ्गल्यं पूर्णकुम्भञ्च शिरःस्थाने निधापयेत्। वैदिकैर्गारुडैर्मन्त्रै रक्षां कृत्वा स्वपेत्ततः"। गर्गः "स्वगेहे प्राक्शिराः शेते आयुष्ये दक्षिणाशिराः। प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः" मार्कण्डेयपु० "प्राक्शिरःशयने विद्यात् धनमायुश्च दक्षिणे। पश्चिमे प्रबलां चिन्तां हानिं मृत्युं तथोत्तरे" तथा "नमस्कृत्याव्ययं विष्णुं समाधिस्थः स्वपेन्निशि" मार्कण्डेयपु० "शून्यागारे श्मशाने च एकवृक्षे चतुष्पथे। महादेवगृहे चापि शर्करालोष्टपांशुषु। धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि। न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम्। नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः। नाकाशे सर्वशून्ये च न च चैत्यद्रुमे तथा"। न स्वपेदित्यर्थः आ० त०। "भुक्त्वा च विधिवन्मन्त्रैर्द्विजो भुक्तावशिष्टकम्। ससुहृद्बान्धवजनः स्वपेत् शुष्कपदो निशि। नोत्तराभिमुखः स्वप्यात् पश्चिमाभिमुखो न च। न चाकाशे न नग्नो वा नाशुचिर्नासने क्वचित्। न शीर्णायान्तु खट्वायां शून्यागारे न चैव हि। नापि वंशे च पालाशे शयने वा कदाचन" कौर्मपु० १८अ० "कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही। गच्छेत् शय्यां सयत्नाञ्च अथवा दारुनिर्मिताम्। शाल्मलस्य कदम्बस्य नीपमन्दारकस्य च। किंशुकस्य वटस्याथ तथा कुशमयस्य च। आरोहणात् भवेत् पापं तस्मात्तेषु न च स्वपेत्। प्ररोह शय्यां स्थले वा अर्पणे परमेश्वरि!। न शुक्रे नापवित्रे च न दर्पणे न च भूतले। तूलिकायां तथा वस्त्रे शय्याभावे स्वपेद्गृही। स्वपेन्न पट्टवस्त्रे च कलङ्को कम्बलेषु च" मत्स्यपु० ४४प०। "श्वासानष्टौ समुत्तानस्तान् द्वि१६पार्श्वे च दक्षिणे। ततस्तद्द्विगुणान्३२ वामे पश्चात् स्वप्यात् यथासुखम्। वामदिशायामनलो नाभेरूर्द्ध्वोऽस्ति जन्तूनाम्। तस्मात्तु वामपार्श्वे शयीत भुक्तप्रपाकार्थम्" भावप्र०। [तत्रैव।

**शयनीय** न० शी-आधारे अनीयर्। शय्यायाम् स्वार्थे क।

**शयनैकादशी** स्त्री ६त०। आषाढ़शुक्लैकादश्याम्।

**शयालु** त्रि० शी-आलुच्। निद्राशीले अमरः। २अजगरे, ३कुक्कुरे च पु० हारा०। [द्रायां न०।

**शयित** त्रि० शी-कर्त्तरि क्त। १निद्रिते। भावे—क्त। नि-

**शयु** पु० शी—उ। १अजगरे सर्पे अमरः। उमन्। शयुनोऽप्यत्र उणादिको०।

**शय्या** स्त्री शी—आधारे क्यप्। १खट्वायाम् अमरः। भावे क्यप्। २शयने ३गुम्फने मेदि०। "त्रिदोषशमनी खट्वा तूली वातकफावहा। भूशय्या बृंहणी वृष्या काष्ठपट्टी तु वातला"। "भूशय्या वातलातीव रूक्षा पित्तास्रनाशिनी। सुशय्याशयनं हृद्यं पुष्टिनिद्राधृतिप्रदम्। श्रमानिलहरं वृष्यं विपरीत मतोऽन्यथा" भावप्र०। तद्गमनविधानं यथा "कृतपादावशौचस्तु भुक्त्वा सायं ततो गृही। गच्छेत् शय्यामस्फुटितामेव दारुमयीं नृप!। नाविशालां न वै भग्नां नासमां मलिनां न च। न च जन्तुमयीं शय्यामधिगच्छेदनास्तृताम्"। विष्णुपु० ३अंशे ११अ०।

**शर** न० शॄ-अच्। १जले २बाणे ३दधिदुग्धाग्रसारे पु० मेदि० ४इषुसाधने तृणभेदे पु०। "भद्रमुञ्जः शरो बाणस्तेजनश्चक्षुवेष्टनः। मुञ्जो मुञ्जातको बाणः स्थूलदर्भः सुमेधसः। मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा। दाहतृष्णाविसर्पास्रमूत्रवस्त्यक्षिरोगजित्। दोषत्रयहरं वृष्यं मेखलासूपयुज्यते" भावप्र०। भावे अप्। ५हिंसायाम्।

**शरकाण्ड** पु० ६त०। १शरस्तम्बे २तन्निर्मितकबाणे च।

**शरज** न० शरात् दधिदुग्धसारात् जायते जन-ड। १हैयङ्गवीने हेमच० शरवणे जाते २कार्त्तिकेये पु०। अग्निकुमारशब्दे ५४पृ० दृश्यम्।

**शरजन्मन्** पु० शरवणे जन्म यस्य। कार्त्तिकेये अमरः।

**शरट** पु० शॄ-अटन्। १कृकलासे अमरः २कुसुम्भशाके च भरतः

**शरण** न० शॄ—ल्युट्। १गृहे २रक्षके अमरः। ३रक्षणे ४वधे